# Ribhuproktam Granthaprashastinirupanam

# ઋભુપ્રોક્તં ગ્રન્થપ્રશસ્તિનિરૂપણમ્

## Document Information

Text title : Ribhuproktam Granthaprashastinirupanam

File name : RRibhuproktaMgranthaprashastinirUpaNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 41| 7-24||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ઋભુપ્રોક્તં ગ્રન્થપ્રશસ્તિનિરૂપણમ્

(એતદ્ગ્રન્થં સમભ્યસેત્)
દેવાનાં ચ ઋષીણાં ચ અત્યન્તં દુર્લભં સદા ।
ઐશ્વરં પરમં જ્ઞાનમુપદિષ્ટં શિવેન હિ ॥ ૪૧.૭॥

એતજ્જ્ઞાનં સમાનીતં કૈલાસાચ્છઙ્કરાન્તિકાત્ ।
દેવાનાં દક્ષિણામૂર્તિર્દશસાહસ્રવત્સરાન્ ॥ ૪૧.૮॥

વિઘ્નેશો બહુસાહસ્રં વત્સરં ચોપદિષ્ટવાન્ ।
સાક્ષાચ્છિવોઽપિ પાર્વત્યૈ વત્સરં ચોપદિષ્ટવાન્ ॥ ૪૧.૯॥

ક્ષીરાબ્ધૌ ચ મહાવિષ્ણુર્બ્રહ્મણે ચોપદિષ્ટવાન્ ।
કદાચિત્બ્રહ્મલોકે તુ મત્પિતુશ્ચોક્તવાનહમ્ ॥ ૪૧.૧૦॥

નારદાદિ ઋષીણાં ચ ઉપદિષ્ટં મહદ્બહુ ।
અયાતયામં વિસ્તારં ગૃહીત્વાઽહમિહાગતઃ ॥ ૪૧.૧૧॥

ન સમં પાદમેકં ચ તીર્થકોટિફલં લભેત્ ।
ન સમં ગ્રન્થમેતસ્ય ભૂમિદાનફલં લભેત્ ॥ ૪૧.૧૨॥

એકાનુભવમાત્રસ્ય ન સર્વં સર્વદાનકમ્ ।
શ્લોકાર્ધશ્રવણસ્યાપિ ન સમં કિઞ્ચિદેવ હિ ॥ ૪૧.૧૩॥

તાત્પર્યશ્રવણાભાવે પઠંસ્તૂષ્ણીં સ મુચ્યતે ।
સર્વં સન્ત્યજ્ય સતતમેતદ્ગ્રન્થં સમભ્યસેત્ ॥ ૪૧.૧૪॥

સર્વમન્ત્રં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ।
સર્વદેવાંશ્ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ॥ ૪૧.૧૫॥

સર્વસ્નાનં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ।
સર્વભાવં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ॥ ૪૧.૧૬॥

સર્વહોમં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ।

સર્વદાનં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ॥ ૪૧.૧૭॥

સર્વપૂજાં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ।
સર્વગુહ્યં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ॥ ૪૧.૧૮॥

સર્વસેવાં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ।
સર્વાસ્તિત્વં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ॥ ૪૧.૧૯॥

સર્વપાઠં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ।
સર્વાભ્યાસં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ॥ ૪૧.૨૦॥

દેશિકં ચ પરિત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ।
ગુરું વાપિ પરિત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ॥ ૪૧.૨૧॥

સર્વલોકં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ।
સર્વૈશ્વર્યં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ॥ ૪૧.૨૨॥

સર્વસઙ્કલ્પકં ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ।
સર્વપુણ્યં ચ સન્ત્યજ્ય એતદ્ગ્રન્થં સમભ્યસેત્ ॥ ૪૧.૨૩॥

એતદ્ગ્રન્થં પરં બ્રહ્મ એતદ્ગ્રન્થં સમભ્યસેત્ ।
અત્રૈવ સર્વવિજ્ઞાનં અત્રૈવ પરમં પદમ્ ॥ ૪૧.૨૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તં ગ્રન્થપ્રશસ્તિનિરૂપણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૪૧। ૭-૨૪॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 41. 7-24..

Notes :
Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita.
Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

*Ribhuproktam Granthaprashastinirupanam*
pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*